M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref. / Ser. ५१३

Title: Tarka Sangraha

713

713

तर्क ~~भाषा~~ संग्रह

Tarka Bhāsā Sangraha	:	Title
Annam Bhatta	:	Author
	:	Editor
	:	Year, Vols.
	:	Publisher
713	:	Remarks

7/3

श्रीगणेशायनमः श्रीसरस्वत्यैनमः निधायहृदिविश्वेशंविधायगुरुवं
दनं। बालानांसुखबोधायक्रियतेतर्कसंग्रहः १ द्रव्यगुणकर्मसामा
न्यसमवायाभावास्सप्तपदार्थाः तत्रद्रव्याणि पृथिव्यप्तेजोवाय्वा
विशेष काशकालदिगात्ममनांसिनवैवरूपरसगंधस्पर्शसं
ख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वस्नेहशब्दबु द्रवत्व ५
द्धिसुखदुःखेछाद्वेषप्रयत्नधर्माधर्मसंस्काराश्चतुर्विंशतिर्गुणाः
उत्क्षेपणापक्षेपणाकुंचनप्रसारणगमनेभेदात्पंचकर्माणि प
रमपरंचेतिद्विविधंसामान्यं नित्यद्रव्यवृत्तयोविशेषास्त्वनंताये
व समवायस्त्वेकएव अभावश्चतुर्विधः प्रागभावः प्रध्वंसा

भावात्यंताभावान्योन्याभावश्चेति तत्रगंधवतीपृथ्वी साद्विवि
धा नित्यानित्याच नित्यापरमाणुरूपा अनित्याकारियरूपा पु
नस्त्रिविधा शरीरेंद्रियविषयभेदात् शरीरमस्मदादीनां इंद्रि
यंगंधग्राहकंघ्राणं नासाग्रवर्तिविषयोमृत्पाषाणादिः शीत
स्पर्शरसवत्यापः ताद्विविधाः नित्यानित्याश्च नित्याःपरमा
णुरूपाः अनित्याःकार्यरूपाः पुनस्त्रिविधाः शरीरेंद्रियविषय
भेदात् शरीरंवरुणलोकेप्रसिद्धं इंद्रियंरसग्राहकंरसनं।
जिह्वाग्रवर्तिविषयसरित्समुद्रादि उष्णस्पर्शवत्तेजः

तद्द्विविधं नित्यमनित्यंच नित्यंपरमाणुरूपं अनित्यंकार्यरूपं पु
नस्त्रिविधं शरीरेंद्रियविषयभेदात् शरीरंसूर्यलोके प्रसिद्धं इं
द्रियंरूपग्राहकंचक्षुः विषयश्चतुर्विधः भौमदिव्यौदर्याकरजभेदा
त् भौमंवन्ह्यादिकं अबिंधनंदिव्यंविद्युदादि भुक्तस्य परिणाम
हेतुरौदर्यं आकरजंसुवर्णादि रूपरहितस्पर्शवान्वायुः सद्विविधो
नित्योनित्यश्च नित्यःपरमाणुरूपः अनित्यःकार्यरूपः पुनस्त्रिविधः
शरीरेंद्रियविषयभेदात् शरीरंवायुलोके इंद्रियंस्पर्शग्राहकंत्वक्
सर्वशरीरवर्ति। विषयावृक्षादिकंपनहेतुः शरीरांतःसंचारीवायुः २
प्राणः सचैकोप्युपाधिभेदात्प्राणापानादिसंज्ञां लभते शब्दगुण

कमाकाशं तच्चैकंविभुनित्यंच अतीतादिव्यवहारहेतुःकालः स
चैकोविभुर्नित्यश्च प्राच्यादिव्यवहारहेतुर्दिक् साचैकाविभ्वीनि
त्यानिच ज्ञानाधिकरणमात्मा सद्विविधः परमात्माजीवश्च त
त्रेश्वरःसर्वज्ञःपरमात्माएकएव जीवःप्रतिशरीरंभिन्नोविभुर्नि
त्यश्च सुखाद्युपलब्धिसाधनमिंद्रियंमनः तच्च प्रत्यात्मनियतत्वा
दनंतमणुरूपंनित्यंच चक्षुर्मात्रग्राह्योगुणोरूपं तच्च शु
क्लनीलपीतरक्तहरितकपिशचित्रभेदात्सप्तविधं पृथ्वीजलते
जोवृत्ति तत्रपृथिव्यांसप्तविधं अभास्वरंशुक्लंजले शुक्लभा
स्वरंतेजसि रसनग्राह्योगुणोरसः सचमधुराम्ललवणकटुक

षायतिक्तभेदात्षडविधः। पृथ्विजलतेजोवृत्तिः तत्रपृथिव्यांषड
विधः। जलेमधुरएव। घ्राणग्राह्योगुणोगंधः। सद्विविधः सुरभि
रसुरभिश्च। पृथ्वीमात्रेवृत्तिः। त्वगिंद्रियमात्रग्राह्योगुणस्पर्शः
। सत्रिविधः। शीतोष्णानुष्णाशीतभेदात्। पृथिव्यप्तेजोवायुवृ
त्तिः। तत्रशीतोजले। उष्णःस्तेजसि। अनुष्णाशीतःपृथ्वीवायवोः
। रूपादिचतुष्टयंपृथिव्यांपाकजमनित्यंच। अन्यत्रापाकजंनि
त्यमनित्यंच। नित्यगतंनित्यमनित्यगतमनित्यं। एकत्वादिव्य
वहारहेतुःसंख्या। नवद्रव्यवृत्तिः। एकत्वादिपरार्धपर्यंत। ३
एकत्वंनित्यमनित्यंच। नित्यगतंनित्यमनित्यगतमनित्यं।

द्वित्वादिकंतुसर्वत्रानित्यमेव। मानव्यवहारासाधारणकार
णंपरिमाणं। नवद्रव्यवृत्तिः। तच्चतुर्विधं। अणुमहद्दीर्घह्र
स्वंचेति। पृथक्व्यवहारासाधारणकारणंपरिमाणं। पृथ
क्त्वं। सर्वद्रव्यवृत्ति। संयुक्तव्यवहारहेतुःसंयोगः। सर्वद्र
व्यवृत्तिः। संयोगनाशिकोगुणोविभागः। सर्वद्रव्यवृत्तिः।
परापरव्यवहारकारणेपरत्वापरत्वे। तेद्विविधे। दिक्कृतेका
लकृतेचेति। दूरस्थेदिक्कृतंपरत्वं। समीपस्थेदिक्कृतमपरत्वं।
जेष्ठेकालकृतंपरत्वं। कनिष्ठेकालकृतमपरत्वं। आद्यपत

नासमवायिकारणं गुरुत्वं। पृथ्वीजलवृत्ति। आद्यस्यंदना
समवायिकारणं द्रवत्वं। तद्द्विविधं। सांसिद्धिकं नैमित्तिकं च
ति। तत्रसांसिद्धिकं जलं। नैमित्तिकं पृथ्वीतेजसोः। पृथिव्यां
घृतादावग्निसंयोगजं द्रवत्वं। तेजसि सुवर्णादौ। चूर्णादि
पिंडीभावहेतुर्गुणस्नेहः। जलमात्रवृत्तिः। श्रोत्रग्राह्यो गु
णः शब्दः। आकाशमात्रवृत्तिः। सद्द्विविधः। धंन्यात्मको
वर्णात्मकश्चेति। ध्वंन्यात्मको भेर्यादौ। वर्णात्मकः सं ४
स्कृतभाषादिरूपः। सर्वव्यवहारहेतुर्बुद्धिर्ज्ञानं। साद्विवि

धा। स्मृतिरनुभवश्च। संस्कारजन्यं ज्ञानं स्मृतिः। तद्भिन्नं ज्ञा
नमनुभवः। सद्द्विविधः। यथार्थोऽयथार्थश्च। तद्वति तत्प्रका
रकोऽनुभवो यथार्थः। सैव प्रमेत्युच्यते। तदभाववति तत्प्रकार
कोऽनुभवोऽयथार्थः। यथार्थानुभवश्चतुर्विधः। प्रत्यक्षानुमि
त्युपमितिशाब्दभेदात्। तत्करणमपि चतुर्विधं। प्रत्यक्षानुमा
व्यापार नोपमानशब्दभेदात्। असाधारणं कारणं करणं। कार्यनिय
तपूर्ववृत्ति कारणं। कार्यं प्रागभावप्रतियोगी। कारणं त्रिवि
धं। समवाय्यसमवायिनिमित्तभेदात्। यत्समवेतं कार्यमु

तर्कः ८ प्रयतेतत्समवायिकारणं। यथातंतवः पटस्य पटश्च स्वगतरूपादेः का
र्येणकारणेनवा सहैकस्मिन्नर्थेसमवेतत्वे सति कारणमसमवा
यीकारणं। यथा। तंतुसंयोगः पटस्य तंतुरूपंपटरूपस्य। त
दुभयभिन्नंकारणंनिमित्तकारणं। यथा। तुरीवेमादिकं ४
तदेतत्त्रिविधकारणमध्येयदसाधारणकारणंतदेवकरणं। त
त्रप्रत्यक्षज्ञानकरणंप्रत्यक्षं। इंद्रियार्थसंनिकर्षजन्यं
ज्ञानंप्रत्यक्षं। तद्द्विविधं। निर्विकल्पकंसविकल्पकंचेति।
तत्रनिष्प्रकारकंज्ञानंनिर्विकल्पकं। सप्रकारकंसविक ८
ज्ञानं

ल्पकं। यथा डित्थोयंब्राह्मणोयंश्यामोयमिति। प्रत्यक्षज्ञान
हेतुरिंद्रियार्थसंन्निकर्षःषड्विधः। संयोगः। संयुक्तसमवायः
। संयुक्तसमवेतसमवायः। समवायः। समवेतसमवायः। वि
शेषणविशेष्यभावश्चेति। चक्षुषा घटप्रत्यक्षेजननीयेसं
योगःसंन्निकर्षः। घटरूपप्रत्यक्षेसंयुक्तसमवायःसन्निक
र्षः। चक्षुःसंयुक्तेघटेरूपस्यसमवायात्। रूपत्वसामान्यप्रत्य म.
क्षेसंयुक्तसमवेतसमवायःसंन्निकर्षः। चक्षुःसंयुक्तेघ
टेरूपंसमवेतं। तत्ररूपत्वस्यसमवायात्। श्रोत्रेणशब्दसा

विशेष

त·सं· क्षात्कारे समवायःसंनिकर्षः।कर्णविवरवर्त्याकाशस्य श्रो
५ त्रत्वात्।शब्दस्यचाकाशगुणत्वात्।गुणगुणिनोःसं
मवायात्।शब्दत्वसाक्षात्कारे समवेतसमवायःसंनि
कर्षः।श्रोत्रसमवेते शब्दे शब्दत्वस्य समवायात्।अभा
वप्रत्यक्षेविशेषणविशेष्यभावःसंनिकर्षः।घटाभाववद्भू
तलमित्यत्र चक्षुःसंयुक्ते भूतले घटाभावस्यविशेषणत्वात्।
एवंसंनिकर्षषट्कजन्यंज्ञानंप्रत्यक्षं।तत्करणमिंद्रियं।तस्मा
दिंद्रियंप्रत्यक्षप्रमाणमितिसिद्धं।छ॥ ण ॥

॥अनुमितिकरणमनुमानं।परामर्शजन्यंज्ञानमनुमितिः॥
व्याप्तिविशिष्टपक्षधर्मताज्ञानंपरामर्शः।यथा वह्निव्याप्य
धूमवानयंपर्वतइतिज्ञानंपरामर्शः।तज्जन्यंपर्वतोवह्नि
मानितिज्ञानमनुमितिः।यत्र धूमस्तत्राग्निरितिसाहचर्य
नियमोव्याप्तिः।व्याप्यस्यपर्वतादिवृत्तित्वंपक्षधर्मता॥
अनुमानंद्विविधं।स्वार्थंपरार्थंच।स्वार्थंस्वानुमितिहेतुः
।तथाहि स्वयमेवभूयोदर्शनेनयत्रधूमस्तत्राग्निरितिमहा
नसादौव्याप्तिंगृहीत्वापर्वतसमीपंगतःतद्गतेचाग्नौसं

द्दिहानः। पर्वते धूमं पश्यन्व्याप्तिंस्मरति। यत्र धूमस्तत्राग्नि
रिति। तदनंतरं वन्हिव्याप्यधूमवानयंपर्वतइतिज्ञानंमुत्पद्य
ते। अयमेवलिंगपरामर्शइत्युच्यते। तस्मात्पर्वतोवन्हिमा
नीतिज्ञानमनुमितिरुत्पद्यते। तदेतत्स्वार्थानुमानं। यत्तुस्व
यंधूमादग्निमनुमीयपरप्रतिपत्यर्थंपंचावयवंवाक्यंप्रयुं
क्ते। तत्परार्थानुमानं। यथापर्वतोवन्हिमान् धूमवत्वात्।
योयोधूमवान् ससोअग्निमान् यथामहानसः। तथाचायं। ८
तस्मात्तथा। अनेनप्रतिपादितात्लिंगात्परोप्यग्निंप्रतिपद्यते।

प्रतिज्ञाहेतूदाहरणोपनयनिगमनानिपंचावयवाः। पर्वतो
वन्हिमानितिप्रतिज्ञा। धूमवत्वादितिहेतुः। योयोधूमवान्
ससोअग्निमान्यथामहानसइत्युदाहरणं। तथाचायमि
त्युपनयः। तस्मात्तथेतिनिगमनं। स्वार्थानुमितिपरार्थानु
मित्योर्लिंगपरामर्शएवकरणं। तस्माल्लिंगपरामर्शोअनु
मानं। लिंगंत्रिविधं। अन्वयव्यतिरेकीकेवलान्वयीकेव
लव्यतिरेकीचेति। अन्वयेनव्यतिरेकेणाचव्याप्तिमदन्व
यव्यतिरेकी। यथावन्हौसाध्येधूमवत्वं। यत्रधूमस्तत्राग्नि

यथाहृतः

तर्कसं. रितिसाहचर्यनियमोव्याप्तिः त्यन्वयव्याप्तिः। यत्रवह्निर्नास्ति
८ तत्रधूमोनास्तीतिव्यतिरेकव्याप्तिः। अन्वयमात्रव्याप्तिकंके
वलान्वयी। यथाघटोभिधेयः प्रमेयत्वात्पटवदिति। अत्रप्र
मेयत्वाभिधेयत्वयोर्व्यतिरेकव्याप्तिर्नास्ति। सर्वस्यप्रमेयत्वा
भिधेयत्वाच्च। व्यतिरेकमात्रव्याप्तिकंकेवलव्यतिरेकि। य
थापृथिवीइतरेभ्योभिद्यतेगंधवत्वात्। यदितरेभ्योनभि
न द्यतेतद्गंधवत्। यथाजलं। नचेयंतथा। तस्मान्नतथेति ८
। तत्रयद्गंधवत्तदितरभिन्नमित्यन्वयदृष्टांतोनास्ति।

पृथिवीमात्रस्यपक्षत्वात्। संदिग्धसाध्यवान्पक्षः। यथाधूमव
त्त्वेहेतौपर्वतः। निश्चितसाध्यवान्सपक्षः। यथातत्रैवमहान
सः। निश्चितसाध्याभाववान्विपक्षः। यथातत्रैवह्रदः। सव्य
भिचारविरुद्धसत्प्रतिपक्षासिद्धबाधिताःपंचहेत्वाभासाः।
सव्यभिचारोनैकांतिकः। सत्रिविधः। साधारणासाधारणानु
पसंहारिभेदात्। तत्रसाध्याभाववद्वृत्तिःसाधारणानैकांति
तिःकः। यथापर्वतोवह्निमान्प्रमेयत्वादिति। प्रमेयत्व
स्यवह्न्यभाववतिह्रदेविद्यमानत्वात्। ~~[illegible]~~

तर्क. ९

[redacted]। सर्वसपक्षविपक्षव्यावृत्तोऽसाधारणः य
था। शब्दो नित्यः शब्दत्वादिति शब्दत्वं नित्येभ्यो अनित्येभ्यो
व्यावृत्तं। शब्दमात्रवृत्ति॥ अन्वयव्यतिरेकदृष्टांतरहितो
नुपसंहारी। स यथा सर्वमनित्यं प्रमेयत्वादिति। अत्र सर्व
स्यापि पक्षत्वात् दृष्टांतो नास्ति। साध्याभावव्याप्तो हे
तुर्विरुद्धः। यथा शब्दो नित्यः कृतकत्वादिति। कृतकत्वं हि
नित्यत्वाभावेनानित्यत्वेन व्याप्तं। साध्याभावसाधकं हे
त्वंतरं यस्य स सत्प्रतिपक्षः। यथा शब्दो नित्यः श्रावण ९

त्वात्। शब्दत्ववत्। शब्दोऽनित्यः कार्यत्वाद्घटवदिति। असि
द्धस्त्रिविधः। आश्रयासिद्धः स्वरूपासिद्धो व्याप्यत्वासिद्धश्चेति।
आश्रयासिद्धो यथा। गगनारविंदं सुरभि। अरविंदत्वात्।
सरोजारविंदवदिति। अत्र गगनारविंदमाश्रयः। स च
नास्त्येव। स्वरूपासिद्धो यथा। शब्दो गुणः। चाक्षुषत्वादिति
अत्र चाक्षुषत्वं शब्दे नास्त्येव। शब्दस्य श्रावणत्वात्। सोपा
धिको व्याप्यत्वासिद्धः। साध्यव्यापकत्वे सति साधनाव्यापक
उपाधिः। साध्यसमानाधिकरणात्यंताभावाप्रतियोगित्वं। सा

तर्कं
१०

ध्यव्यापकत्वं। साधनवंन्निष्ठात्यंताभावप्रतियोगित्वं साधना
व्यापकत्वं। यथा धूमवान्वन्हिरित्यादौ आर्द्रेंधनसंयोग उपाधिः
। यत्र धूमस्तत्रार्द्रेंधनसंयोग इति साध्यव्यापकत्वं। यत्र वन्हिस्त
त्रार्द्रेंधनसंयोगो नास्तीति साधनाव्यापकत्वं। एवं साध्यव्या
पकत्वे सति साधनाव्यापकत्वादार्द्रेंधनसंयोग उपाधिः। ये
वं सोपाधिकत्वाद्वन्हिमत्वं व्याप्यत्वासिद्धं। यस्य साध्याभावः
प्रमाणांतरेण निश्चितः स बाधितः। यथा वन्हिरनुष्णः द्र
व्यत्वादिति। अत्र अनुष्णत्वं साध्यं। तदभाव उष्णत्वं। तच्चत्वा १०

चाप्रत्यक्षेण गृह्यत इति बाधितत्वं। व्याख्यातमनुमानं॥ ॥
इति अनुमानं॥ उपमितिकरणं उपमानं। संज्ञासंज्ञिसंबंध
ज्ञानं उपमितिः। तत्करणं सादृश्यज्ञानं। तथाहि। कश्चिद्गवय
शब्दार्थमजानानः कुतश्चित्पुरुषाद्गोसदृशो गवय इति श्रुत्वा
वनं गतो वाक्यार्थं स्मरन्गोसदृशं पिंडं पश्यति। तदनंतरं
अयं गवय इति शब्दवाच्य इति रुत्पद्यते।। आप्तवाक्यं शब्दः।
आप्तस्तु यथार्थवक्ता। १ त्युपमिति २ वाक्यं पदसमूहः। य
थागामानयेति। शक्तं पदं। अस्मात्पदादयमर्थो बोद्धव्य इति

तर्कसं॰ ईश्वरसंकेतः शक्तिः। आकांक्षायोग्यतासंन्निधिश्च वाक्यार्थज्ञान
११ हेतुः। पदस्य पदांतरव्यतिरेकप्रयुक्तान्वयाननुभावकत्वमाकां
क्षा। अर्थाबाधो योग्यता। पदानामविलंबेनोच्चारणं संन्नि
धिः। आकांक्षादिरहितं वाक्यमप्रमाणं यथा गौरश्वः पुरुषो
हस्तीति न प्रमाणं आकांक्षाविरहात्। अग्निना सिंचेदिति न
प्रमाणं योग्यताविरहात्। प्रहरे प्रहरे असहोच्चारितानिग ११
मानयेत्यादिपदानि न प्रमाणं। सान्निध्याभावात्। वाक्यं
द्विविधं। वैदिकं लौकिकं च। वैदिकमीश्वरोक्तं सर्वमेव प्र

माणं। लौकिकं त्वाप्तोक्तं प्रमाणं। अन्यदप्रमाणं। वाक्यार्थज्ञानं
शाब्दज्ञानं। तत्करणं शब्दः। यथार्थानुभवो निरूपितः। अयथार्था
नुभवस्त्रिविधः। संशयविपर्ययतर्कभेदात्। एकस्मिन् धर्मिणि वि
रुद्धनानाधर्मवैशिष्ट्यज्ञानं संशयः। यथा स्थाणुर्वा पुरुषो वेति।
मिथ्याज्ञानं विपर्ययः। यथा शुक्ताविदं रजतमिति। व्याप्यारोपेण
व्यापकारोपस्तर्कः। यथा यदि वह्निर्न स्यात् तर्हि धूमोऽपि न स्यात्
इति। स्मृतिरपि द्विविधा। यथार्था अयथार्था च। प्रमादि
जन्या यथार्था। अप्रमाजन्या अयथार्था। सर्वेषामनुकूलवे

तर्क २२ दनीयंसुखं। प्रतिकूलवेदनीयंदुःखं। इछाकामः। क्रोधोद्वेषः।
कृतिःप्रयत्नः। विहितकर्मजोधर्मः। निषिद्धकर्मजन्याधर्मः। बुध्या
दयोष्टावात्ममात्रगुणाः। बुद्धिइछाप्रयत्नानिनित्याअनित्याश्च।
नित्याईश्वरस्य। अनित्याजिवस्य। संस्कारस्त्रिविधः। वेगोभाव
नास्थितिस्थापकश्चेति। वेगःपृथिव्यादिचतुष्टयमनोवृत्तिः।
अनुभवजन्यास्मृतिहेतुर्भावना। आत्ममात्रवृत्तिः। अन्यथा
कृतस्यपुनस्तादवस्थ्यापादकःस्थितिस्थापकःकटादिपृथिवी
वृत्तिः। चलनात्मकंकर्म। ऊर्ध्वदेशसंयोगहेतुरुत्क्षेपणं॥ १२

अधोदेशसंयोगहेतुरपक्षेपणं। शरीरसंन्निकृष्टसंयोग
हेतुराकुंचनं। विप्रकृष्टसंयोगहेतुःप्रसारणं। अन्यत्सर्वंगमनं।
नित्यमेकमनेकानुगतंसामान्यं। द्रव्यगुणकर्मवृत्ति। परंसत्ता
। अपरंद्रव्यत्वादि। नित्यद्रव्यवृत्तयोव्यावर्तकाविशेषानित्याः। नि
त्यसंबंधःसमवायः। अयुतसिद्धवृत्तिः। ययोर्मध्येएकमपराश्रीतमे
१५ वावतिष्ठतेतावयुतसिद्धौ। अवयवावयविनौगुणगुणिनौक्रियाक्रियाव
न्तौजातिव्यक्तीविशेषनित्यद्रव्येचेति। अनादिःसांतःप्रागभावः। उत्पत्तिः
पूर्वंकार्यस्य। सादिरनंतःप्रध्वंसः। उत्पत्यनंतरंकार्यस्य। त्रैकालिकसं
सर्गावछिन्नप्रतियोगिताकोत्यंताभावः। यथाभूतलेघटोनास्तीति।
तादात्म्यसंबधावछिन्नप्रतियोगिताकोऽन्योन्याभावः॥

तर्क. यथाघटःपटोनभातिति।सर्वेषामपिपदार्थानांयथायथमुक्तेष्वेवांतर्भा
१३ वात्सप्तैवपदार्थाइतिसिद्धं।काणाद।न्यायमतयोर्बालव्युत्पत्तिसिद्धये
।अन्नंभट्टेनाविदुषारचितास्तर्कसंग्रहः।इतिस्तर्कसंग्रहः समाप्तः॥

१३